ॐ

रावसाहेब मल्लप्पा वसाप्पा वारद यांच्या उदार
आश्रयाखालीं प्रसिद्ध होणाऱ्या वीरशैव-
लिंगिब्राह्मणधर्मग्रंथमालेपैकीं

वीरशैवसदाचारसंग्रह

यांतील

प्रकरण १५ वें.

जंगमलक्षण.

(महाराष्ट्र तात्पर्यासह)

वेदमूर्ति मणूर मठाध्यक्ष मल्लिकार्जुनशास्त्री
यांनीं सोलापूर येथें
'कल्पतरु' छापखान्यांत छापवून प्रसिद्ध केलें.

आवृत्ति १ ली, प्रती १०००.
शके १८२७, सन १९०५.

किंमत ८१.

[illegible]
[illegible]
[illegible]
[illegible]
25-10-86
[illegible]

त जंगमाचें माहात्म्य कोट्यवधि कल्पापर्यंत्तही सांगतां येणें अशक्य आहे.
(९) तथापि, हे देवि, तुझ्या संतोषाकरितां मी संक्षेपानें सांगतों. प्रा-

[illegible]

[illegible]

[illegible]

[illegible]

28-10-86

[illegible]

अथ निराभारिस्थलस्थस्वयचरपरलक्षणकथन नाम पंचदशप्रकरणम्

अथ निराभारिलक्षणम्

सुप्रभेदागमे ॥ यः शंभुः सर्वलोकानां मुक्त्यर्थं धरणीतले ॥ चरत्यतिथिरूपेण नमस्तस्मै चरात्मने ॥ १ ॥

देव्युवाच

भगवंस्त्वन्मुखादेव गुरोर्लिंगस्य लक्षणम् ॥ श्रुत्वा तद्द्वयमाहात्म्यमहं धन्याऽभवं विभो ॥ २ ॥ इदानीं चरमाहात्म्यं तच्चिन्हं तस्य गौरवम् ॥ तदाचारविधिं श्रोतुं ममेच्छा वर्तते विभो ॥ कृपया केवलं नाथ वद कारुण्यसागर ॥ ३ ॥

ईश्वर उवाच

सम्यक्पृष्टं त्वया गौरि साधु सन्मति मत्प्रिये ॥ वक्तुं तच्चरमाहात्म्यं कल्पकोटिशतैरपि ॥ ब्रह्मादीनां च सर्वेषामशक्यं मम तु प्रिये ॥ ४ ॥ तथापि त्वन्मुदे देवि संक्षेपेण वदाम्यहम् ॥ गो-

---

निराभारिलक्षणः–(१) (सुप्रभेदागम) सर्व लोकांना मुक्ति देण्याकरितां जो शंभु अतिथिरूपानें या पृथ्वीतळावर संचार करितो, त्या चरात्मक (जंगमरूपी) शंभूला नमस्कार असो. देवी ह्मणाली–(२) 'भगवन्, आपल्या मुखानेंच गुरूचें व लिंगाचें लक्षण आणि त्या दोहोंचें माहात्म्य ऐकून मी धन्य झालें. प्रभो, (३) आतां जंगमाचें माहात्म्य, त्याचें लक्षण, त्याचें श्रेष्ठत्व व त्याचा आचारविधि ऐकण्याची माझी इच्छा आहे. ह्मणून हे प्रभो, हे दयासागरा, हे नाथा, तें सगळें कृपा करून स्पष्ट सांगावें' ईश्वर ह्मणतात–'(४) शाबास प्रिये! तूं बुद्धिमान आहेस. गौरि, तूं चांगलें विचारिलेंस प्रिये, ब्रह्मा वगैरे देवांना व मला तें जंगमाचें माहात्म्य कोट्यवधि कल्पांपर्यंतही सांगतां येणें अशक्य आहे. (५) तथापि, हे देवि, तुझ्या संतोषाकरितां मी संक्षेपानें सांगतों. प्रा-

पनीयं प्रयत्नेन मंत्रवत्प्राणवल्लभे ॥ ५ ॥ जंकाराज्जननं दूरं गकाराद्गतिनाशनम् ॥ मकारान्मरणं नष्टं जंगमस्त्र्यक्षरात्मकः ॥ ६ ॥ यस्य नास्ति पुनर्जन्म गतिर्नास्ति कदाचन ॥ बाधते यं न मरणं शृणु नाथे स जंगमः ॥ ७ ॥ जरामरणशून्यत्वा-द्गमागमनवर्जनात् ॥ मनुष्याचाररहित्याज्जंगमोऽयमुदाहृतः ॥८॥ निरालंबो निर्विकल्पः कर्मपाशविवर्जितः ॥ निःशून्यो निष्कलः साक्षाज्जंगमः स परः स्मृतः ॥ ९ ॥ गुणातीतः क्रियातीतः कलातीतश्चिरंतनः ॥ तत्वातीतः परः साक्षाज्जंगमः शृणु मत्प्रिये ॥ १० ॥ निर्मोही निष्प्रियः शून्यः सत्वादिगुणवर्जितः ॥ निराभारी निष्प्रपंचः सच्चिदानंदलक्षणः ॥ ११ ॥ शुद्धदेहः

णवल्लभे, मंत्राप्रमाणें हें माहात्म्य गुप्त ठेवावें. (६) 'जं' जन्म दूर करणारा, 'ग' संसारांत सांपडण्याची गति नाहींशी करणारा व 'म' मरणाचा नाश करणारा. याप्रमाणें तीन अक्षरांचा मिळून जंगम शब्द झाला आहे. (७) प्रिये, ऐक. ज्याला पुनः जन्म नाहीं, ज्याला कधींही गति (संसारांत फिरणें) नाहीं व ज्याला मरणाची बाधा होत नाहीं, तो जंगम होय. (८) प्रपंचांतील झातारपण व मरण यांच्या अभावा-मुळें, जाणें येणें यांपासून दूर असल्यामुळें व मानवी आचारांपासून वेगळा असल्यामुळें याला जंगम ह्मणतात. (जंगमाला झातारपण नाहीं व म-रण नाहीं, प्रपंचाच्या फेऱ्यांत तो सांपडत नाहीं व मानवी आचारांपा-सून तो वेगळा आहे. हीं लक्षणें असतात ह्मणून त्याला जंगम ह्मणतात.) (९) जंगम हा स्वतंत्र, विकल्परहित, कर्मपाशांत न सांपडणारा, निःशून्य (शून्यापलीकडचा) व अखंड असा साक्षात् परमात्माच आहे. (१०) प्रिये, ऐक. गुणांच्या पलीकडचा, क्रियेहून वेगळा असणारा, भेदाहून अतीत, शाश्वत व तत्वांपासून भिन्न असणारा, साक्षात् परमा-त्माच जंगम होय. (११) मोहरहित, निष्प्रिय, शून्य, सत्वादि गुणां-पासून अलिप्त, निराभारी, प्रपंचापासून वेगळा राहिलेला; सत् चित् व आनंद या लक्षणांचा, (१२) पवित्र शरीराचा, शुद्धमनाचा, शुद्धभावाचा,

शुद्धमनाः शुद्धभावः शिवात्मकः ॥ शुद्धबुद्धिः शुद्धगतिः शुद्धानां शुद्धिदायकः ॥ १२ ॥ सदसद्वस्तुरहितः सत्यासत्यविवर्जितः ॥ कर्माकर्मविनिर्मुक्तश्चरः साक्षान्निरंजनः ॥ १३ ॥ स्वयश्चरः पर इति जंगमेऽस्मिन्निरंजने ॥ अस्ति भेदत्रयं सम्यग्ज्ञातव्यं वल्लभे त्वया ॥ १४ ॥

देव्युवाच

स्वामिन्सत्करुणावार्धे तस्य भेदत्रयस्य च ॥ लक्षणं श्रोतुमिच्छामि वद सत्कृपया विभो ॥ १५ ॥

ईश्वर उवाच

साधु साधु महाभागे सम्यक्पृष्टं त्वयाऽधुना ॥ ज्ञातुं शक्यं न सर्वेषामिदं तेऽद्य वदाम्यहम् ॥ १६ ॥ अंगीकृत्य सदाचारं धृत्वा जंगमलक्षणम् ॥ ज्ञात्वा सद्धर्ममखिलं भूत्वा सुज्ञानवान्शुचिः ॥ १७ ॥ त्यक्त्वा दुष्कर्मनिचयं मुक्त्वा दौर्जन्यलक्ष-

---

शिवस्वरूपी, शुद्धबुद्धीचा, शुद्धगतीचा, शुद्धवस्तूंना शुद्ध करणारा, (१३) चांगलें व वाईट या दोहोंपलीकडचा, खरें व खोटें यांपासून भिन्न असलेला व कर्म आणि अकर्म यांपासून वेगळा राहणारा हा जंगम प्रत्यक्ष निरंजन (परमात्माच) होय. (१४) या निरंजन जंगमाचे स्वय, चर व पर, असे तीन भेद आहेत. प्रिये, ते तूं नीट समजून घे.

देवी ह्मणते–' (१५) हे नाथा, हे दयासागरा, त्या तिन्ही भेदांचें लक्षण ऐकण्याची माझी इच्छा आहे. तर प्रभो, कृपा करून तें सांगावें. ईश्वर ह्मणतात–'(१६) शाबास! शाबास! महाभागे, त्वां आतां चांगला प्रश्न केला. जें कोणालाही समजणें शक्य नाहीं, तें मी आज तुला सांगतों. (१७) सदाचाराचा अंगीकार करून जंगमाच्या चिन्हाचें धारण करून आपला श्रेष्ठ धर्म सगळा जाणून ज्ञानी व पवित्र व्हावें. (१८) सर्व वाईट कर्मांचा त्याग करावा. दुर्जनपणाचें लक्षण टाकून

णम् ॥ हित्वा दुष्टमतिं शास्त्रं मत्वा सद्वेदशैवकम् ॥ १८ ॥ मठमेकं समाश्रित्य कृत्वा सल्लिंगपूजनम् ॥ तत्पुरस्थितसद्भक्तगृहे भिक्षामटन्मुदा ॥ १९ ॥ तद्भिक्षार्जितसद्द्रव्येष्वास्थां हित्वा निरंतरम् ॥ सावधानमनाः सम्यक्सत्यज्ञानपरो भवेत् ॥ २० ॥ गतागतेशभक्तानां चराणामौपचारकम् ॥ कुर्वन्यो वसते नित्यं स एव स्वयजंगमः ॥ २१ ॥

अथ चरजंगमलक्षणम्

षट्स्थलाचारसंपत्तिं धृत्वा हित्वाऽष्टदुर्मदान् ॥ षड्वर्गविक्रियां त्यक्त्वा कृत्वा षट्कर्मभंजनम् ॥ २२ ॥ षडूर्मिकचयं नीत्वा भित्वा षट्भ्रमणोन्मदम् ॥ षडक्षरमनुं जप्त्वा भूत्वा तद्वन्निरंजनः ॥ २३ ॥ पंचाक्षरमनुं ध्यात्वा पंचक्लेशान्विपाटयन् ॥ वंचयन् वंचतां सम्यग्ज्ञानं ॥ संपत्तिवैभवात् ॥ २४ ॥ मलत्रयतरुं छित्वा धूलीकुर्वन्मदाचलम् ॥ छिंदन्पाशाष्टकलतां भिंदन्

द्यावें. वाईट बुद्धि सोडून वेदाचें व शैवशास्त्रांचें मनन करावें. (१९) एका मठांत राहून लिंगपूजा करावी. त्या गांवांतील सद्भक्तांच्या घरीं आनंदानें भिक्षा मागावी. (२०) त्या भिक्षेंत मिळालेल्या द्रव्यावरील आस्था सोडून निरंतर सावधमनानें सत्यज्ञानांतच चांगलें गढून जावें. (२१) आल्या गेलेल्या ईश्वरभक्तांचा आदरसत्कार करावा. याप्रमाणें जो नित्य वर्तन करीत असतो तो स्वयजंगम होय. आतां चरजंगम लक्षण --(२२) षट्स्थलाचाररूपी संपत्तीचें ग्रहण करून (षट्स्थलाचारानें वागून) आठ प्रकारचा मद टाकावा. षड्वर्गाच्या दुष्टक्रियांचा त्याग करून, षट्कर्मांचा नाश करावा. (२३) षडूर्मींना दूर करून व सहा प्रकारचा उन्माद नाहींसा करून षडक्षरमंत्राचा जप करावा आणि निरंजन (उपाधिरहित) व्हावें. (२४)पंचाक्षर मंत्राचा जप करीत पांच प्रकारचा क्लेश उपटून टाकावा. सत्यज्ञानरूपी ऐश्वर्यानें मायेला फस- (२५) मलत्रयरूपी (तीनप्रकारचा मळ हेंच झाड त्या)

व्यसनसप्तकम् ॥ २५ ॥ वीरमाहेश्वराचारसंपद्वृद्धिं दिने दिने ॥ पालयित्वा प्राणसमं कायवाङ्मानसैः परम् ॥ २६ ॥ शैवानुभावकं शास्त्रमंगीकृत्य पुराश्रयम् ॥ तदेवाखिलशिष्याणामुपादिश्य दिने दिने ॥ २७ ॥ तदन्तःस्थमलं क्षाल्य कृत्वा तानखिलान् शुचीन् ॥ तैः समं निखिलान् देशान्संचरन् शुद्धभावतः ॥ २८ ॥ तद्देशस्थमहाभक्तनिवहैः कृतपूजनम् ॥ स्वीकुर्वन्मोदतोऽवाधं पावयंस्तान्महाजनान् ॥ २९ ॥ कांश्चिद्दर्शनमात्रेण कांश्चिदंघ्रिसमीलनात् ॥ हस्तस्पर्शनतः कांश्चित्पावयन्प्राणिनोयने (प्रणतान् जनान्) ॥ ३० ॥ एवं रीत्या भक्तिभिक्षां स्वीकुर्वन्संचरन्सदा ॥ चरपट्टाधिकारी यः स एव चरजंगमः ॥ ३१ ॥

देव्युवाच

भो स्वामिन् करुणासिन्धो भवता भाषितं खलु ॥ चरपट्टाधिकारीति तत्कथं वद मे विभो ॥ ३२ ॥

झाडाला तोडून मदरूपी पर्वत फोडावा. अष्टपाशरूपी वेली छाटून सप्त व्यसनें नाहींशीं करावीं. (२६) वीरमाहेश्वराच्या आचाररूपी संपत्तीचें कायावाचामनानें प्राणाप्रमाणें उत्तम रीतीनें रोज संरक्षण करावें. (२७) शिवाचा महिमा ज्यांत सांगितला आहे अशा मुख्य अधारभूतशास्त्राचा अंगीकार करून त्याचाच सर्व शिष्यांना दररोज उपदेश करावा. (२८) आणि त्या योगानें त्यांच्या अंतःकरणांतील मळ धुवून त्यांना शुद्ध करावें. त्यांना बरोबर घेऊन शुद्धभावानें सर्व देशांत फिरावें. (२९) त्या त्या देशांत मोठमोठ्या भक्तांनीं केलेल्या पूजेचा आनंदानें स्वीकार करून त्या महाभक्तांना पावन करावें. (३०) कोणांला दर्शनानेंच, कोणांला त्यांनीं केलेल्या नमस्कारानें, व कोणांला हस्तस्पर्शानें, याप्रमाणें शरण आलेल्या प्राण्यांला पावन करावें. (३१) या रीतीनें भक्तिभिक्षेचा अंगिकार करीत नेहमीं संचार करणारा जो चरपट्टाधिकारी तोच चरजंगम होय.'

देवी ह्मणते, '(३२) हे स्वामिन्, हे दयासागरा, चरपट्टाधिकारी असें आपण ह्मटलें, तें कसें? तें, प्रभो, मला सांगावें.' ईश्वर ह्मणतात–

ईश्वर उवाच

सत्यं सन्मतिके गौरि मयोक्तं नलिनेक्षणे ॥ वदामि शृणु संमोदाच्चरपट्टस्य लक्षणम् ॥ ३३ ॥ चरते निखिलान्देशान् रटत्यैशानभावकम् ॥ पठते स्वात्मनि परं चरपट्टं तदेव हि ॥ ३४ ॥ गुरुः स चरभक्तानां संमुखे सर्वसंमतम् ॥ ददाति यस्य शिष्यस्य स एव चरपट्टवान् ॥ ३५ ॥

देव्युवाच

स्वामिन्नेतन्महापट्टं दातव्यं कीदृशे यथा ॥ दातव्यं सर्वमेतस्य लक्षणं वद मे विभो ॥ ३६ ॥

ईश्वर उवाच

सम्यग्ज्ञानवति ख्याते सर्वचातुर्यवित्प्रिये ॥ वदामि तस्य सर्वं ते लक्षणं शृणु संमुदा ॥ ३७ ॥ कुष्ठिने पंगवेऽधाय कुब्जायात्यन्तकामिने ॥ श्रद्धाभक्तिविहीनाय दुर्मदाय दुरात्मने ॥ ३८ ॥ अनधीतात्मविद्याय परनिंदापराय च ॥ परस्त्रीपरवित्तादि-

---

'(३३) हे बुद्धिमति गौरि, मीं खरें सांगितलें. हे कमळाक्षि, चरपट्टाचें लक्षण सांगतों, आनंदानें ऐक. (३४) सर्व देशांत फिरतो, ईश्वरावरील भावाविषयीं सांगतो (ईश्वरावर भाव ठेवा असें सांगतो) व अंतःकरणांत परमात्म्याचें स्मरण करितो, ह्मणून त्याला चरपट्ट ह्मणतात. (३५) जंगमांच्या व भक्तांच्या समक्ष सगळ्यांच्या अनुमतीनें गुरु ज्या शिष्याला चरपट्ट देतो तोच चरपट्टाचा अधिकारी होय.' देवी ह्मणते, '(३६) नाथा, हें चरपट्ट कोणत्या प्रकारच्या शिष्याला द्यावें व कशा रीतीनें द्यावें, तें सगळें लक्षण हे विभो, मला सांगावें.' ईश्वर ह्मणतात. '(३७) हे कीर्तिमति, तुजमध्यें खरें ज्ञान वसतें. तूं सर्व चातुर्य जाणतेस. प्रिये, तीं सर्व लक्षणें तुला आनंदानें सांगतों, ऐक. (३८) जो कुष्ठरोगी, पंगु, आंधळा, कुबडा, अतिशय कामी, भावभक्तिहीन, मदोन्मत्त, दुष्ट, (३९) आत्मविद्या न जाणणारा, दुसऱ्याची निंदा करणारा, परस्त्री,

परिग्रहादराय च ॥३९॥ व्रतभ्रष्टाय सत्कार्यकृतविघ्नाय दुर्हृदे ॥ दुर्दोषाहितचित्ताय दुराचारपराय च ॥ ४० ॥ कृतघ्नाय गुरुद्रोहकृतचित्ताय सर्वथा ॥ न देयं ज्ञानहीनाय चरपट्टं वरानने ॥ ४१ ॥ दमितेंद्रियवर्गाय सत्याचारपराय च ॥ निरहंकारिणे सत्यवचसे शुद्धचेतसे ॥ ४२ ॥ शिवानुभावसच्छास्त्रकथनात्ताधिकारिणे ॥ पुरातनीयसन्मार्गनिरताय सदात्मने ॥ ४३ ॥ कुलीनाय सदालिंगजंगमार्चापराय च ॥ परद्रव्याबलामुख्यग्रहणेऽनात्तचेतसे ॥ ४४ ॥ नखनेत्रादिसर्वांगेष्वक्षताय च धीमते ॥ श्रद्धाभक्तिमते सम्यग्देयं तत्कमलानने ॥ ४५ ॥ अस्मै तदेव दातव्यमित्यास्था स्याद्गुरोरपि ॥ शुद्धाचारवतां भक्तमाहेशानां समाज्ञया ॥ ४६ ॥ देयं तद्गुरुणा तस्मै भक्तमाहेशसंमुखे ॥

परधन इत्यादि परिग्रहाचें ग्रहण करणारा, (४०) व्रतभ्रष्ट, सत्कार्यांत विघ्न करणारा, दुष्ट अंतःकरणाचा, पापबुद्धीचा, दुराचारानें वागणारा, (४१) कृतघ्न किंवा मनानें गुरुद्रोह करणारा असेल, व जो ज्ञानहीन असेल, त्याला, हे सुंदरि, चरपट्टाधिकार देऊं नये. (४२) ज्यानें सगळीं इंद्रियें ताब्यांत ठेविलीं आहेत, जो सदाचारानें वागतो, जो निगर्वी, सत्यवचनी, व शुद्धमनाचा आहे, (४३) ज्यानें शिवाचें माहात्म्य व शैवशास्त्रें सांगण्याचा अधिकार संपादिला आहे, प्राचीन अशा उत्तम मार्गानें जो चालतो, जो निर्मलांतःकरणाचा, (४४) कुलीन, लिंग जंगमांची सेवा करण्यांत नेहमीं तत्पर, परद्रव्य, परस्त्री इत्यादिकांचें ग्रहण करण्यांत चित्त न ठेवणारा, (४५) नख नेत्र इत्यादि कोणत्याही अवयवांत ज्याला व्यंग नाहीं असा, जो बुद्धिमान आणि भावभक्तियुक्त असेल, त्यालाच, हे कमलमुखि, हें चरपट्ट उत्तम रीतीनें द्यावें. (४६) अमक्याला हें चरपट्ट द्यावें असें गुरूनें ठरविल्यानंतर सदाचारी अशा भक्त व माहेश्वरांच्या आज्ञेनें (४७) त्या भक्त व माहेश्वरांच्या समक्ष गुरूनें त्याला चरपट्ट द्यावें, तो (ज्याला चरपट्ट द्यावयाचें

तत्संमतः स हि नचेन्न देयं गुरुणा हठात् ॥ ४७ ॥ आत्मीयाखिलशिष्याणां भक्तमाहेशसंसदाम् ॥ यः संमतो भवेत्तस्मै देयं तद्गुरुणा शिवे ॥ ४८ ॥ प्रापंचिकवदागंतुकान्यत्राधानिवृत्तये ॥ पत्रमांत्यं लिखित्वास्मै न देयाद्गुरुरीश्वरि ॥४९॥ दातव्यं गृहिभिः सर्वैः पार्थिवैः परभीतये ॥ आशाहीनैर्विरक्तैस्तन्न देयं न विभेत्तदा ॥ ५० ॥ एतच्छास्त्रं विचार्येत्थं भक्तमाहेशसंमुखे ॥ देयात्तं चरपट्टं हि गुरुः शिष्याय धीमते ॥५१॥ गुरौ लिंगैक्यतां यातेऽप्यदत्वा स्वाश्रमं तदा ॥ भक्तमाहेश्वराः सर्वे मिलितास्तदनंतरम् ॥ ५२ ॥ तदंतेवासिनिचये दृष्ट्वा तं ज्ञानिनं शुचिम् ॥ दापितव्यं तदा तस्मै चान्यपट्टाधिकारिणा ॥५३॥ शिवानुभावसच्छास्त्रपुस्तकादानपूर्वकम् ॥ गृहीत्वा गुरुणा पट्टं

असेल तो शिष्य) जर त्यांना (भक्त व माहेश्वर यांना) मान्य नसेल, तर गुरूनें त्याला आपल्याच हेक्यानें चरपट्ट देऊं नये. (४८) पार्वति, आपल्या सर्व शिष्यांपैकीं जो भक्त माहेश्वरांच्या सभेला पसंत पडेल, त्यालाच गुरूनें चरपट्ट द्यावें. (४९) प्राप्त होणाऱ्या अडचणी दूर करण्याकरितां ह्मणून प्रापंचिक मनुष्याप्रमाणें (एखाद्याच्या नांवानें) मृत्युपत्र करून त्याला चरपट्ट गुरूनें देऊं नये. (५०) मृत्युपत्रानें अधिकार गृहस्थांनीं व शत्रूंच्या भयामुळें सर्व राजांनीं द्यावा; परंतु आशाहीन अशा विरक्तांनीं देऊं नये व भिऊं नये. (५१) या शास्त्राचा याप्रमाणें विचार करून गुरूनें बुद्धिमान शिष्याला भक्तमाहेश्वरांच्या समक्ष चरपट्ट द्यावें. (५२) आपला चरपट्टाधिकार (कोणत्याही शिष्याला) न देतां गुरु लिंगैक्य पावला तर (गुरूनें देह ठेविला तर) मग सर्व भक्तमाहेश्वरांनीं मिळून (५३) त्याच्या शिष्यसमूहांतून ज्ञानी व पवित्र अशा शिष्याला निवडून दुसऱ्या पट्टाधिकाऱ्याकडून त्याला चरपट्ट देववावें. (५४) शिवमाहात्म्य ज्यांत आहे अशीं शास्त्राचीं (शिवानुभवशास्त्रांचीं) पुस्तकें वगैरे गुरूकडून घेऊन त्याच्या गादीवर जो

चरते स चरः स्मृतः ॥ ५४ ॥

अथ परजंगमलक्षणम्

तृणं ब्रह्मा तृणं विष्णुस्तृणानींद्रादिदेवताः ॥ तृणान्यष्टौ महाभोगास्तृणान्यष्टौ विभूतयः ॥५५॥ सिद्धयोऽष्टौ तृणान्यन्ये भोगा अपि तृणोपमाः ॥ चतुर्विधपदान्येवं तृणानि त्रिजगंति च ॥५६॥ लोकस्थितावलामुख्यमहाभोगास्तृणानि वै ॥ स्वर्णालंकारमुख्यानि तृणानीति निराशया ॥ ५७ ॥ मत्वैतानि च वस्तूनि निरस्येतरसंपदः ॥ यत्र यत्र स्पृहास्पर्शस्तत्र तत्रैव संचरन् ॥ ५८ ॥ श्रीखण्डपंकयोर्मल्लीसुमवर्बूरपुष्पयोः ॥ लोहकांचनयोरुग्रविषपीयूषयोरपि ॥ ५९ ॥ कुकुंदेऽपि च पिष्टे च शाखाशाल्यन्नयोरपि ॥ पयस्तूष्णीकयोर्दिव्यमंचलोष्ठाव्रतावनौ॥६०॥कार्पासे पट्टवासे च गाजौ

बसतो त्याला चर ह्मणतात. परजंगम लक्षणः—(५५) ब्रह्मा, विष्णु इंद्रादि देव, अष्ट महाभोग, अष्ट विभूति गवताप्रमाणें समजून (५६) अष्टसिद्धि, सर्व भोग, चार प्रकारची मुक्ति व त्र्यलोक्य हें सर्व कवडीमोल मानून (५७) जगांतील स्त्रीसुख वगैरे मोठ्या सुखांना तुच्छ मानून. सोन्याचे अलंकारादिक ही तुच्छ समजून निराशा (५८) या प्रत्येक वस्तूविषयीं बाळगून आणि दुसऱ्या कोणत्याही संपत्तीकडे दुर्लक्ष्य करून जेथें जेथें आशेचा स्पर्शही राहणारा नाहीं, तेथें तेथेंच संचार करावा. (५९) चंदन आणि चिखल, जाईचें फूल आणि बाभळीचें फूल, लोखंड आणि सोनें जालीम विष आणि अमृत, (६०) कुकुंद (रांगोळी ज्यापासून तयार करतात तो धोंडा) आणि पीठ, झाडपाला आणि शाल्यन्न (पक्कान्न), दूध आणि कण्हेरी, पलंगानें अच्छादिलेली जागा आणि ढेंकळांनीं आच्छादिलेली जागा, (६१) कापसाचें वस्त्र आणि रेशमी वस्त्र कांच आणि रत्नें, मोतीं, राजा आणि भिक्षुक, श्रीमान् आणि

रत्ने च मौक्तिके ॥ क्षोणिभृच्चरयोर्लक्ष्मीवदकिंचनयोरपि ॥ ६१ ॥
गंगापल्वलयोः क्षेत्रे श्मशानेऽपि च दैवतें ॥ मानुषे भाषणे मंत्रे
सत्येऽसत्ये शुभेऽशुभे ॥ ६२ ॥ मृगद्विण्मेषयोः सर्पपृथुरोम्नोश्च
सर्वदा ॥ सर्वत्रैकमतिं कृत्वा समदृष्टिं समक्षमाम् ॥ ६३ ॥
भवितव्यमिदं मह्यं भवितव्यमिदं न मे ॥ अकृत्वास्था-
मिति सदा भोग्येषु द्रव्यराशिषु ॥ ६४ ॥ सदा
तृप्तिं समासाद्य सदानंदी भवन् स्वयम् ॥ स्वपाददर्शनादेव
भक्तानां चान्यदेहिनाम् ॥६५॥ मृगपक्षिपतंगानां पश्वादीनां च
जीविनाम् ॥ दत्वा मोक्षं विधींद्रादीन्सुरसंदोहदुर्लभाम् ॥ ६६ ॥
स्वपादतीर्थतस्तोयं तीर्थं कृत्वा चरेत्सदा ॥ निरंजनः सन् यो लोके
स एव परजंगमः ॥६७॥ अयं साक्षात्परंब्रह्म ह्ययमेव निरंजनः ॥

हरिद्री, (६२) गंगा आणि डबकें, क्षेत्र आणि स्मशानभूमि, दैवत आणि मनुष्य, भाषण आणि मंत्र सत्य आणि असत्य शुभ आणि अशुभ, (६३) सिंह आणि बोकड सर्प आणि मासा या सर्वांच्या ठिकाणीं नेहमीं सारखा भाव, सारखी दृष्टि आणि सारखी सहनशीलता ठेवावी. (६४) अमुक माझें व्हावें अमुक माझें होऊं नये अशा प्रकारचीं द्रव्यावर किंवा भोग्य वस्तूंवर आस्था ठेवूं नये. (६५) स्वतः नेहमीं संतुष्ट असावें आणि आनंदांत असावें. आपल्या पाउलांच्या दर्शनानेंच भक्तांना, दुसऱ्या मनुष्यांना (६६) मृग, पक्षी व किडे यांना पशू वगैरे जीवांना आणि ब्रह्मा, इंद्र इत्यादिकांना-अनेक देवांनाही दुर्लभ अशी-मुक्ति देत (६७) आपल्या पायाच्या तीर्थानें पाणीच तीर्थ करीत नेहमीं संचार करावा. (याप्रमाणें) जगांत जो निरंजन (सर्व उपाधीं-पासून अलिप्त) राहतो तोच परजंगम होय. (६८) हा साक्षात् पर-ब्रह्मच होय हाच निरंजन, हाच महायोगी आणि हाच सत्पुरुष होय.

अयमेव महायोगी ह्ययमेव सदात्मकः ॥ ६८ ॥ देहं धृत्वाऽपि निर्देही गुणवानपि निर्गुणः ॥ एतस्योत्कर्षतां वक्तुं ममाशक्यं महेश्वरि ॥ ६९ ॥ इति परजंगमलक्षणम् ॥

इति श्रीमद्वीरशैवसदाचारसंग्रहे निराभारिस्थलस्थस्वयचररलक्षणकथनं नाम पंचदशप्रकरणं समाप्तम्

---

(६९) हा देहधारी असूनही देहरहित आणि गुणयुक्त असूनही गुणांपासून वेगळा आहे. ' देवि, याचें माहात्म्य सांगणें मला अशक्य आहे.' येथें परजंगमलक्षण संपलें.

याप्रमाणें श्रीमद्वीरशैवसदाचारसंग्रहांतील निराभारिस्थलांतील स्वयजंगम चरजंगम आणि परजंगमलक्षणकथन नांवाचें पंधरावें प्रकरण संपलें.

॥ समाप्त ॥



॥ पुराणश्रवणविधिकथनम्. ॥

शिवरहस्यखंडापैकीं उपदेशकांडांतील ११ व्या अध्यायांतील श्लोक.

व्याख्यानमंडपं सर्वमलंकृत्य वितानकैः ॥ चामरैर्दर्पणैश्चित्रैः कुसुमैर्विविधैःशुभैः ॥ १ ॥ प्राधान्येन च यः श्रोता प्रभुर्वा पृथिवीपतिः ॥ नियमेन परेणासावहरहर्ब्राह्मणैः सह ॥ २ ॥ तैरनुज्ञापितो नित्यं प्रीतैः प्रीतेन चेतसा ॥ सम्यग्भुक्त्वाथवाऽभुक्त्वा श्रावयेच्छ्रद्धया सह ॥ ३ ॥ वक्तारमपि विद्वांसं पुराणस्यास्य शीलिनम् ॥ जितेंद्रियं जितक्रोधं स्कंदेशेशान्युपासकम् ॥ ४ ॥ वेदवेदांतनिष्णातं वेदांतार्थविचारिणम् ॥ कुटुंबिनं कुलीनं तं पुत्रपौत्रकलत्रिणम् ॥ ५ ॥ ब्रह्मांजलिकरो विद्वान् ब्रह्मविद्यामिमां क्रमात् ॥ उपक्रम्य शुभे काले चंद्रताराबलान्विते ॥ ६ ॥ दशाहरहरध्यायान् श्रुणायात्सुसमाहितः ॥ कांडे कांडे समाप्ते तु ब्राह्मणान् भोजयेच्छुभान् ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥ ७ ॥ पंचाशदपि वा तेषां चतुर्विंशतिकानपि ॥ द्वादशापि चा विप्राणां भोजयेत्प्रीतयेशितुः ॥ ८ ॥ संपूज्य च समाप्तौ तु पुराणस्यास्य कृत्स्नशः ॥ महाविभवविस्तारं ब्राह्मणान् भोजयेत्सुधीः ॥ ९ ॥ यानमारोप्य वक्तारं वाद्यमंगलगायकैः ॥ ग्रामप्रदक्षिणं कृत्वा स्वगृहं प्रापयेत्सुधीः ॥ १० ॥

विक्रीस तयार.

१.	शिवपरअभंग	०७.
२.	शिवोत्कर्षकीर्तनतरंगिणी भाग १ ला.	०६.
३.	,, भाग २ रा.	०६.
४.	,, भाग ३ रा.	०४.
५.	मराठी सिद्धरामेश्वर चरित्र.	०७.

छापत असलेले ग्रंथ.

१. शिवपुराण [वायवीय संहिता.]

२. अनादिवीरशैवसारसंग्रह.

विक्रीस तयार.

१. इरिहरतारतम्य (मराठी अर्थासह) किंमत ०४.

२. पादोदकविचार किंमत ०३.

३. रामायणसारसंग्रह- (अप्पयदीक्षितकृत) ह्यांत शिवाचा महिमा सर्वांपेक्षां अधिक असल्याचें वर्णन आहे. किंमत ०६.

४. उपयुक्त वेंचे-ह्यांत शैवधर्मास अनुकूळ असे इतर पुराणांतील अर्थासह उतारे दिले आहेत. किंमत ०७.

५. विरक्तोत्पत्तिक्रियालक्षण किंमत ०४.

६. पारमेश्वरागम भाग १ ला मराठी अर्थासह किंमत १ रुपया.

७. पारमेश्वरागम भाग २ रा मराठी अर्थासह किंमत १ रुपया.

८. प्रभुलिंगलीला भाग १ ला (भविष्यत्पुराणांतर्गत) -यांत अल्लमप्रभूची लीला फारच चटकदार रीतीनें वर्णिलेली आहे. किंमत १०८.

९. प्रभुलिंगलीला भाग २ रा (भविष्यत्पुराणांतर्गत)-ह्यांत प्रमथगणांचे अवतार, त्यांचीं चरित्रें व महादेवीअक्कास कृतार्थ केल्याचें वर्णन आहे. किं. १०४.

१०. प्रभुलिंगलीला भाग ३ रा (भविष्यत्पुराणांतर्गत)-ह्यांत अल्लमप्रभूनें बसवेश्वरास व इतर भक्तांस तत्त्वोपदेश केल्याचें वर्णन आहे. किंमत १ रुपया.

११. पंचाचार्यपंचमोत्पत्तिप्रकरणम् (सुप्रबोधागमांतर्गत) -यांत पंचाचार्य व पचम यांची उत्पत्ति कशी झाली याबद्दल माहिती आहे. किंमत ०६.

१२. वीरमाहेश्वरप्रकरणम्-(स्कंदपुराण शंकरसंहितामध्यपठित) यांत वीरशैवांची विशेष प्रशंसा आहे किंमत ०८.

१३. दीक्षादिकथनम् (श्रीव्यासकृत लिंगपुराण उत्तरभागांतील). यांत विष्णु, ब्रह्मदेव, वगैरे देवांनीं लिंगधारण केले याबद्दल माहिती आहे. किंमत ०२.

१४. सूक्ष्मागम-किं. ०१०, याचें स्वरूप व महत्त्व समजावें म्हणून याचें पटल पांचवें किं. ०१, सहावें किं. ०१, सातवें किं. ०१। व नववें किं. ००९ हीं निराळीं छापविलीं आहेत

१५. संक्षिप्त लिंगपूजा.वि[illegible] लोकांना रोज समग्र लिंगपूजा करतां येत नाहीं, सबब थोड्या वेळांत (१५-२० मिनिटांत) लिंगपूजा करतां यावी म्हणून हा लहानसा ग्रंथ तयार केला आहे. किं. ००९

१६. वीरशैवलिंगिब्राह्मणवंशावलिपट किंमत १.

यांपैकीं कोणत्याही ग्रंथाच्या एकदम दहा प्रती घेणारास एक प्रत बक्षिस मिळेल.

ग्रंथ मिळण्याचीं ठिकाणें.

सोलापूर येथें रा. सा. मल्लप्पा वसप्पा वारद यांचे दुकानीं व याशिवाय मुंबई, विजापूर, व कलबुर्गा येथें रावसाहेब वारद यांचे दुकानीं विकत मिळतील.